Saptapadi in Gṛhya Sūtras belonging to different branches of the four vedas

## Ṛg Veda

### Āśvalāyana & Śānkhāyana

इष एकपद्यूर्जे द्विपदी रायस्पोषाय त्रिपदी मायोभव्याय चतुष्पदी प्रजाभ्यः पञ्चपद्यृतुभ्यः षट्पदी सखा सप्तपदी भव सा मामनुव्रता भव । पुत्रान्विन्दावहै बहूस्ते जरदष्टयः ॥

### Kausītaki

इष एकपदी । विष्णुस्त्वा नयतु । ऊर्जे द्विपदी । विष्णुस्त्वा नयतु । रायस्पोषाय त्रिपदी । विष्णुस्त्वा नयतु । मायो भव्याय चतुष्पदी । विष्णुस्त्वा नयतु । प्रजाभ्यः पञ्चपदी । विष्णुस्त्वा नयतु । ॠतुभ्यः षट्पदी । विष्णुस्त्वा नयतु । सखा सप्तपदी भव । विष्णुस्त्वा नयतु ॥

## Śukla Yajurveda

### Pāraskara

एकमिषे विष्णुस्त्वान्नयतु । द्वे ऊर्जे विष्णुस्त्वान्नयतु । त्रीणि रायस्पोषाय विष्णुस्त्वान्नयतु । चत्वारि मायोभवाय विष्णुस्त्वान्नयतु । पञ्च पशुभ्यः विष्णुस्त्वान्नयतु । षड् ॠतुभ्यः विष्णुस्त्वान्नयतु । सखे सप्तपदा भव मामनुव्रता भव ॥

## Kṛṣṇa Yajur Veda

### Āpastamba

एकमिषे विष्णुस्त्वान्वेतु ।द्वे ऊर्जे विष्णुस्त्वान्वेतु । त्रीणि व्रताय विष्णुस्त्वान्वेतु । चत्वारि मायोभवाय विष्णुस्त्वान्वेतु । पञ्च पशुभ्यो विष्णुस्त्वान्वेतु । षड्तुभ्यो विष्णुस्त्वान्वेतु । सप्त सप्ताभ्यो होत्राभ्यो विष्णुस्त्वान्वेतु । सखा सप्तपदा भव सप्तपदा बभूव । सख्यं ते गमेयँ सख्यात्ते मा योषं सख्यन्मे मा योष्ठाः । समयाव सं कल्पावहै संप्रियौ रोचिष्णू सुमस्यमानौ । इषमूर्जमभि संवसानौ । सं नो मनाँसि सं व्रता सम चितान्या करम् ॥

### Hiraṇyakeśi

एकमिषे विष्णुस्त्वान्वेतु ।द्वे ऊर्जे विष्णुस्त्वान्वेतु । त्रीणि व्रताय विष्णुस्त्वान्वेतु । चत्वारि मायोभवाय विष्णुस्त्वान्वेतु । पञ्च पशुभ्यो विष्णुस्त्वान्वेतु । षड्रायस्पोषय विष्णुस्त्वान्वेतु । सप्त सप्ताभ्यो होत्राभ्यो विष्णुस्त्वान्वेतु । सखायौ सप्तपदाबभूव सख्यं ते गमेयं सख्यात्रे मा योषं सख्यान्मे मा योष्ठाः ।।

Baudhāyana

एकमिषे विष्णुस्त्वाऽन्वेतु । द्वे ऊर्जे विष्णुस्त्वाऽन्वेतु । त्रीणि व्रताय विष्णुस्त्वाऽन्वेतु । चत्वारि मायोभवाय विष्णुस्त्वाऽन्वेतु । पञ्च पशुभ्यो विष्णुस्त्वाऽन्वेतु । षड्रायस्पोषय विष्णुस्त्वाऽन्वेतु । सप्त सप्ताभ्यो होत्राभ्यो विष्णुस्त्वाऽन्वेतु । सखायस्सप्तपदा अभूव सख्यं ते गमेयं सख्यात्रे मा योषं सख्यान्मे मा योष्ठाः ।।

Vārāha

एकमिषे विष्णुस्त्वां नयतु । द्वे ऊर्जे । त्रीणि रायस्पोषाय । चत्वारि मायोभवाय । पञ्च पशुभ्यः । ष्ड्तुभ्यः । सप्त सप्ताभ्यो होत्राभ्यः ॥ विष्णुस्त्वाऽन्वेतु । सखी सप्तपदी भव सख्यं ते गमेयँ सख्यात्ते मा रिषिम् ।।

Mānava

एकमिषे द्वे ऊर्जे त्रीणि प्रजाभ्यश्चत्वारि रायस्पोषाय पञ्च भवाय ष्ड्तुभ्यः । सखा सप्तपदीभव सुमृडीका सरस्वति । सा ते व्योम संदृशी । विष्णुस्त्वा मुन्नयत्विति सर्वत्रानुषजति ॥

Āgniveśya

एकमिषे विष्णुस्त्वान्वेतु । द्वे ऊर्जे विष्णुस्त्वान्वेतु । त्रीणि व्रताय विष्णुस्त्वान्वेतु । चत्वारि मायोभवाय विष्णुस्त्वान्वेतु । पञ्च पशुभ्यो विष्णुस्त्वान्वेतु । षड्रायस्पोषय विष्णुस्त्वान्वेतु । सप्त सप्ताभ्यो होत्राभ्यो विष्णुस्त्वान्वेतु । सखायौ सप्तपदाबभूव सख्यं ते गमेयं सख्यात्रे मा योषं सख्यान्मे मा योष्ठाः ।।

Bhāradvāja

एकमिषे विष्णुस्त्वान्वेतु । द्वे ऊर्जे विष्णुस्त्वान्वेतु । त्रीणि व्रताय विष्णुस्त्वान्वेतु । चत्वारि मायोभवाय विष्णुस्त्वान्वेतु । पञ्च पशुभ्यो विष्णुस्त्वान्वेतु । षड्रायस्पोषय विष्णुस्त्वान्वेतु । सप्त सप्ताभ्यो होत्राभ्यो विष्णुस्त्वान्वेतु । सखा सप्तपदा भव सखायौ सप्तपदाबभूव । सख्यं ते गमेयं सख्यात्रे मा योषं सख्यान्मे मा योष्ठाः ।।

Kāṭhaka

एकमिषे द्वे ऊर्जे त्रीणि रायस्पोषाय चत्वारि मयीभवाय पञ्च प्रजाभ्यः ष्ड्तुभ्यो दीर्घायुत्वाय । सप्तं सखा सप्तपदा भव । सुमृडीका सरस्वति मा ते व्योम संदृशी । विष्णुस्त्वान्वेत्यनुषङ्गः ॥

Vaikhānasa

एकमिषे विशष्णुरिति द्वे ऊर्जे इति त्रीणि व्रतायेति पञ्च पशुभ्य इति ष्ड्रयस्पोषायेति सप्त सप्तभ्य इति तान्यर्यायेणाक्रम्य गत्वा सखेति निवर्तेत ॥

## Sama Veda

### Gobhila & Khādira

एकमिषे विष्णुस्त्वा नयतु ।द्वे ऊर्जे विष्णुस्त्वा नयतु । त्रीणि व्रताय विष्णुस्त्वा नयतु । चत्वारि मायोभवाय विष्णुस्त्वा नयतु । पञ्च पशुभ्यो विष्णुस्त्वा नयतु । षड्रायस्पोषय विष्णुस्त्वा नयतु । सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वा नयतु । सखा सप्तपदी भव सख्यं ते गमेयँ सख्यं ते मा योषाः सख्यं ते मा योष्ठाः ।।

### Jaimini Gṛhyasūtra

एकमिषे विष्णुस्त्वान्वेतु । द्वे ऊर्जे विष्णुस्त्वान्वेतु । त्रीणि रायस्पोषाय विष्णुस्त्वान्वेतु । चत्वारि मयोभवाय विष्णुस्त्वान्वेतु । पञ्च प्रजाभ्यो विष्णुस्त्वान्वेतु । षड़तुभ्यो विष्णुस्त्वान्वेतु । सखा सप्तपदी भव ।।

## Atharva Veda

### Kauśika

सप्तमर्यादाः कवयस्ततक्षुस्तासामिदेकामभ्यं हुरे गात् । आयोर्ह स्कम्भ उपमस्य नीडे पथां विसर्गे धरुणेषु तस्थौ ॥ इषे त्वा सुमङ्गलि प्रजावति सुसीम । ऊर्जे त्वा रायस्पोषाय त्वा सौभाग्याय त्वा सांम्राज्याय त्वा संपदे त्वा जीवातवे त्वा सुमङ्ग्लि प्रजावति सुसीम इति सप्तमं सखा सप्तपदी भव ॥